# Shri Batukabhairava Brahma Kavacham

# શ્રીબટુકભૈરવબ્રહ્મકવચમ્

## Document Information

Text title : Batukabhairava Brahmakavacha

File name : baTukabhairavabrahmakavacham.itx

Category : kavacha, shiva

Location : doc_shiva

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, PSA Easwaran

Latest update : October 15, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

Shri Batukabhairava Brahma Kavacham

# શ્રીબટુકભૈરવબ્રહ્મકવચમ્

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીઉમામહેશ્વરાભ્યાં નમઃ ॥

॥ શ્રીગુરવે નમઃ ॥

॥ શ્રીભૈરવાય નમઃ ॥

શ્રીદેવ્યુવાચ ।
ભગવન્સર્વવેત્તા ત્વં દેવાનાં પ્રીતિદાયકમ્ ।
ભૈરવં કવચં બ્રૂહિ યદિ ચાસ્તિ કૃપા મયિ ॥ ૧॥

પ્રાણત્યાગં કરિષ્યામિ યદિ નો કથયિષ્યસિ ।
સત્યં સત્યં પુનઃ સત્યં સત્યમેવ ન સંશયઃ ॥ ૨॥

ઇત્થં દેવ્યા વચઃ શ્રુત્વા પ્રહસ્યાતિશયં પ્રભુઃ ।
ઉવાચ વચનં તત્ર દેવદેવો મહેશ્વરઃ ॥ ૩॥

ઈશ્વર ઉવાચ ।
બાટુકં કવચં દિવ્યં શ‍ૃણુ મત્પ્રાણવલ્લભે ।
ચણ્ડિકાતન્ત્રસર્વસ્વં બટુકસ્ય વિશેષતઃ ॥ ૪॥

તત્ર મન્ત્રાદ્યક્ષરં તુ વાસુદેવસ્વરૂપકમ્ ।
શઙ્ખવર્ણદ્વયો બ્રહ્મા બટુકશ્ચન્દ્રશેખરઃ ॥ ૫॥

આપદુદ્ધારણો દેવો ભૈરવઃ પરિકીર્તિતઃ ।
પ્રવક્ષ્યામિ સમાસેન ચતુર્વર્ગપ્રસિદ્ધયે ॥ ૬॥

પ્રણવઃ કામદં વિદ્યા લજ્જાબીજં ચ સિદ્ધિદમ્ ।
બટુકાયેતિ વિજ્ઞેયં મહાપાતકનાશનમ્ ॥ ૭॥

આપદુદ્ધારણાયેતિ ત્વાપદુદ્ધારણં નૃણામ્ ।
કુરુદ્વયં મહેશાનિ મોહને પરિકીર્તિતમ્ ॥ ૮॥

બટુકાય મહેશાનિ સ્તમ્ભને પરિકીર્તિતમ્ ।
લજ્જાબીજં તથા વિદ્યાન્મુક્તિદં પરિકીર્તિતમ્ ॥ ૯॥

દ્વાવિંશત્યક્ષરો મન્ત્રઃ ક્રમેણ જગદીશ્વરિ ।

॥ ૐ હ્રીં બટુકાય આપદુદ્ધારણાય કુરુ કુરુ બટુકાય હ્રીં ॥

ઇસકા જપ કવચ સે પહલે ઔર બાદ મેં ૧૧ યા ૨૧ બાર કરેં ॥

ૐ અસ્ય શ્રીબટુકભૈરવબ્રહ્મકવચસ્ય ભૈરવ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીબટુકભૈરવો દેવતા ।
મમ શ્રીબટુકભૈરવપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

અથ પાઠઃ ।
ૐ પાતુ નિત્યં શિરસિ પાતુ હ્રીં કણ્ઠદેશકે ॥ ૧૦॥

બટુકાય પાતુ નાભૌ ચાપદુદ્ધારણાય ચ ॥

કુરુદ્વયં લિઙ્ગમૂલે ત્વાધારે વટુકાય ચ ॥ ૧૧॥

સર્વદા પાતુ હ્રીં બીજં બાહ્વોર્યુગલમેવ ચ ॥

ષડઙ્ગસહિતો દેવો નિત્યં રક્ષતુ ભૈરવઃ ॥ ૧૨॥

ૐ હ્રીં બટુકાય સતતં સર્વાઙ્ગં મમ સર્વદા ॥

ૐ હ્રીં પાદૌ મહાકાલઃ પાતુ વીરાસનો હૃદિ ॥ ૧૩॥

ૐ હ્રીં કાલઃ શિરઃ પાતુ કણ્ઠદેશે તુ ભૈરવઃ ।
ગણરાટ્ પાતુ જિહ્વાયામષ્ટાભિઃ શક્તિભિઃ સહ ॥ ૧૪॥

ૐ હ્રીં દણ્ડપાણિર્ગુહ્યમૂલે ભૈરવીસહિતસ્તથા ।
ૐ હ્રીં વિશ્વનાથઃ સદા પાતુ સર્વાઙ્ગં મમ સર્વદઃ ॥ ૧૫॥

ૐ હ્રીં અન્નપૂર્ણા સદા પાતુ ચાંસૌ રક્ષતુ ચણ્ડિકા ।
આસિતાઙ્ગઃ શિરઃ પાતુ લલાટં રુરુભૈરવઃ ॥ ૧૬॥

ૐ હ્રીં ચણ્ડભૈરવઃ પાતુ વક્ત્રં કણ્ઠં શ્રીક્રોધભૈરવઃ ।
ઉન્મત્તભૈરવઃ પાતુ હૃદયં મમ સર્વદા ॥ ૧૭॥

ૐ હ્રીં નાભિદેશે કપાલી ચ લિઙ્ગે ભીષણભૈરવઃ ।
સંહારભૈરવઃ પાતુ મૂલાધારં ચ સર્વદા ॥ ૧૮॥

ૐ હ્રીં બાહુયુગ્મં સદા પાતુ ભૈરવો મમ કેવલમ્ ।
હંસબીજં પાતુ હૃદિ સોઽહં રક્ષતુ પાદયોઃ ॥ ૧૯॥

ૐ હ્રીં પ્રાણાપાનૌ સમાનં ચ ઉદાનં વ્યાનમેવ ચ ।
રક્ષતુ દ્વારમૂલે ચ દશદિક્ષુ સમન્તતઃ ॥ ૨૦॥

ૐ હ્રીં પ્રણવં પાતુ સર્વાઙ્ગં લજ્જાબીજં મહાભયે ।
ઇતિ શ્રીબ્રહ્મકવચં ભૈરવસ્ય પ્રકીર્તિતમ્ ॥ ૨૧॥

ચતુર્વર્ગપ્રદં નિત્યં સ્વયં દેવપ્રકાશિતમ્ । (ચતુર્વર્ગફલપ્રદં)
યઃ પઠેચ્છૃણુયાન્નિત્યં ધારયેત્કવચોત્તમમ્ ॥ ૨૨॥

સદાનન્દમયો ભૂત્વા લભતે પરમં પદમ્ ।
યઃ ઇદં કવચં દેવિ ચિન્તયેન્મન્મુખોદિતમ્ ॥ ૨૩॥

કોટિજન્માર્જિતં પાપં તસ્ય નશ્યતિ તત્ક્ષણાત્ ।
જલમધ્યેઽગ્નિમધ્યે વા દુર્ગ્રહે શત્રુસઙ્કટે ॥ ૨૪॥

કવચસ્મરણાદ્દેવિ સર્વત્ર વિજયી ભવેત્ ।
ભક્તિયુક્તેન મનસા કવચં પૂજયેદ્યદિ ॥ ૨૫॥

કામતુલ્યસ્તુ નારીણાં રિપૂણાં ચ યમોપમઃ ।
તસ્ય પાદામ્બુજદ્વન્દ્વં રાજ્ઞાં મુકુટભૂષણમ્ ॥ ૨૬॥

તસ્ય ભૂતિં વિલોક્યૈવ કુબેરોઽપિ તિરસ્કૃતઃ ।
યસ્ય વિજ્ઞાનમાત્રેણ મન્ત્રસિદ્ધિર્ન સંશયઃ ॥ ૨૭॥

ઇદં કવચમજ્ઞાત્વા યો જપેદ્બટુકં નરઃ ।
ન ચાપ્નોતિ ફલં તસ્ય પરં નરકમાપ્નુયાત્ ॥ ૨૮॥

મન્વન્તરત્રયં સ્થિત્વા તિર્યગ્યોનિષુ જાયતે ।
ઇહ લોકે મહારોગી દારિદ્ર્યેણાતિપીડિતઃ ॥ ૨૯॥

શત્રૂણાં વશગો ભૂત્વા કરપાત્રી ભવેજ્જડઃ ।
દેયં પુત્રાય શિષ્યાય શાન્તાય પ્રિયવાદિને ॥ ૩૦॥

કાર્પણ્યરહિતાયાલં બટુકભક્તિરતાય ચ ।
યોઽપરાગે પ્રદાતા વૈ તસ્ય સ્યાદતિસત્વરમ્ ॥ ૩૧॥

આયુર્વિદ્યા યશો ધર્મં બલં ચૈવ ન સંશયઃ ।

ઇતિ તે કથિતં દેવિ ગોપનીયં સ્વયોનિવત્ ॥ ૩૨॥

॥ ઇતિ શ્રીરુદ્રયામલોક્તં શ્રીબટુકભૈરવબ્રહ્મકવચં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com
PSA Easwaran

*Shri Batukabhairava Brahma Kavacham*
pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*